Ex/SANS/PG/3.3B/2025

**MASTER OF ARTS EXAMINATION, 2025**

**( 2nd Year, 1st Semester )**

**SANSKRIT**

**COURSE : XIII/B**

**[ Saṃhitā Texts]**

*Time* : 2 Hours *Full Marks* : 30

*The figures in the margin indicate full marks.*

सर्वेषां प्रश्नानामुत्तरं संस्कृतभाषायां देवनागरीलिप्या च प्रदेयम्।

१. अधःप्रदत्तेषु प्रश्न**द्वयस्य** उत्तरं लेखनीयम्। 8×2=16

(क) ऋग्वेदीय–पुरुषसूक्तानुसारेण वैदिकदर्शनभावना सम्यक् विव्रियताम्।

(ख) ऋग्वेदस्य नासदीयसूक्तमवलम्ब्य सृष्टितत्त्वविषयको विचारः साधु प्रस्तूयताम्।

(ग) अथर्ववेदीयभूमिसूक्तमनुसृत्य पर्यावरणचिन्तनं वैशद्येन समुपवर्ण्यताम्।





२. अधोलिखितयोः **एकस्य** मन्त्रस्य व्याख्या करणीया। 6×1=6

(क) यस्मिन्नृचः साम यजूंषि यस्मि–
न्प्रतिष्ठिता रथनाभाविवाराः।
यस्मिंश्चित्तं सर्वमोतं प्रजानां
तन्मे मनः शिवसंकल्पमस्तु।।

(ख) कालो अश्वो वहति सप्तरश्मिः सहस्राक्षो अजरो भूरिरेताः।
तमा रोहन्ति कवयो विपश्चितस्तस्य चक्रा भुवनानि विश्वा।

३. निम्नलिखितेषु **चतुर्णां** प्रश्नानाम् उत्तरं प्रदीयताम्। 2×4=8

(क) ऋग्वेदगतस्य नदीसूक्तस्य ऋषिच्छन्दोदेवतानामानि उपस्थाप्यन्ताम्।

(ख) "प्र सप्त सप्त त्रेधा चक्रमु" — नद्यः केन प्रकारेण सप्त सप्त भूत्वा त्रिप्रकारं प्रवहन्ति?

(ग) सिन्धोः अग्रगमनाय कः मार्गान् अरचयत्? सिन्धुः किमभिलक्ष्य प्रवहति?

(ध) सिन्धुः नार्या सह कथं तुलिता?

(ङ) सिन्धोः पूर्वतटवर्तिनीनां नदीनां नामानि उल्लेखनीयानि।

(च) कथं सिन्धुः मानवानां कल्याणकारिणी?

★★★